चक्रायुधप्रवरभाव सधूतस्य तस्य ॥
लोकेश्वरस्य सुगतस्य सुखात्मकस्य
तत्मङ्गलं भवतु ते परमाभिषेक ॥[२६]

अमिताभरूपं शिष्यं ध्यात्वा अद्याभिषिक्तत्वमसि बुद्धैः वज्राभिषेकतः ।

इदंतत्सर्व्वबुद्धत्वं गृन्हवज्र सूसिद्धय हृदादौपृष्ट्वा वज्रंहस्तेनदद्यात ॥ इति वज्राभिषेकेन प्रत्यवेक्षणाज्ञानं ॥[२७]

ओँ धर्मवज्रीणि ह्रीँ
शिरपृष्ठे अमिताभ रक्तवर्ण समाधि मुद्रया व्यवस्थितं

(घ) अमिताभ बुद्धया धारणी

ओँ नमो भवगते[२८] अमिताभाय[२९] तथागतायार्हते[३०] सम्यक्संबुद्धाय् ॥ तद्यथा ॥ ओँ अमित[३१] २ अमितोद्भव[३२] अमितसंभव[३३] अमितसिद्धे[३४] अमिततेज[३५] अमितविक्रान्ते[३६] अमितगामिने[३७] अमितगगनकीर्त्तिकरे[३८] अमृतदुंदुभिस्वरे[३९] सर्वार्थसाधने[४०] सर्वकर्म्मक्लेशक्षयंकरि[४२] स्वाहा ॥

॥ इति अमिताभ धारणी समाप्त ॥[४३]

●

अमोघसिद्धि बुद्ध

मूलसंस्कृतपाठ–

६) अमोघसिद्धि बुद्ध

(क) अमोघसिद्धि बुद्धया ध्यान

उत्तरदिग्गतविजयश्रीअमोघसिद्धिजिनवरं
गरुडमासनस्थितश्यामवर्णं ।[१]

खंकारोत्पन्नश्यामाभं उत्तरे गरुडासनं
अभयमुद्रासंयुक्तं नमामि अमोघसिद्धिं ।[२]

सप्तफणिमयालंकृतं हरितवर्णविराजितं
उत्तरमुखश्रीअमोघसिद्धिं नमामि श्रीगरुडवाहनं ॥[३]

उत्तरे अमोघसिद्धिं विश्वपाणिं विद्याधरं
गरुडवाहनं संपूर्णं श्यामवर्णं नमस्तुते ॥[४]

उत्तरमुखं श्रीगरुडवाहनं हरितवर्णदेहं
सप्तफणिमयालंकृतं अमोघसिद्धिविद्यादायकं ॥[५]

मञ्जुवज्रमण्डले .... उत्तरस्याममोघसिद्धिर्हरितः खड्गचक्र-मणिकमलधरः । *(नि.यो. पृ. ३)*

श्रीसम्पुटतन्त्रोक्तवज्रसत्त्वमण्डले ...... उत्तरेऽमोघसिद्धिर्हरितः सव्याभ्यां वज्राङ्कुशौ वामाभ्यां घण्टाकपालौ । *(नि.यो. पृ. ९)*

कालचक्रमण्डले पूर्वस्यांदिशि अमोघसिद्धिः कृष्णः कृष्णरक्तसितवदनः सव्यैः करैः खड्गकर्त्रित्रिशूलानि वामैः फलककपालखट्वाङ्गानि दधानौ लोचनालिङ्गितः । *(नि.यो. पृ. ८५)*

वज्रधातुमण्डले उत्तरस्यां गरुडोपरि विश्वाम्भोजस्य कर्णिकायाममोघसिद्धिर्वज्रपर्यङ्की श्यामो दक्षिणपाणिना विश्ववज्रं मध्याङ्गुल्या बिभ्रदभयदानाभिनयी वाममुत्तानमुत्सङ्गे स्थापयन्। *(नि.यो. पृ. ४५)*

यमारेर्मण्डले उत्तरे इर्ष्यायमारिः श्यामः श्यामकृष्ण-सितत्रिवदनः सव्याभ्यां खड्गचक्रौ वामाभ्यां मणिपद्मे बिभ्राणः।[६]

पिण्डीक्रमोक्तमण्डले अमोघसिद्धिर्हरितो हरित कृष्णसितास्यः, खड्ग विश्ववज्र चक्रघण्टा हरित पद्ममणिभृत्।[७]

त्रिचत्वारिंशदात्मक मञ्जुवज्रमण्डले उत्तरे गरुडोपरि विश्वाब्जसुर्येऽमोघसिद्धिः सत्त्वपर्यङ्की रक्तवर्णो रक्तनीलशुक्लमूल सव्यवाममुखः षड्भुजो द्वाभ्यामा- वद्ध ध्यानमुद्रः सव्याभ्यां खड्गतर्जनीं वामाभ्यां कुचाङ्कुशौ बिभर्ति।[८]

धर्मधातुवागीश्वरमण्डले उत्तरकोष्ठस्य मध्ये गरुडेऽमोघसिद्धिः श्यामः चतुर्मुखः मुलं श्यामं द्रंष्ट्राकरालं दक्षिणं पीतं शान्तं पश्चिमं रक्तं सश्रृङ्गारं वामंसितं शान्तमष्टभुजो दक्षिणैः खड्गवज्रवाणाङ्कुशभृद्वा मैस्तर्जनीघण्टाचापपाशधरः वज्रकर्मवज्ररक्षवज्रयक्ष-वज्रसन्धिभिः परिवृतः।[९]

(ख) अमोघसिद्धि बुद्धया विशुद्धि

सत्त्वार्थक्रियायां सकला सिद्धिर्यतः सोऽमोघसिद्धिः।[१०]

वाचा (चां) स्वरव्यञ्जनात्मिकानामीश्वरोऽनाहतस्वभावोऽ-मोघसिद्धिरुर्णाचक्रवर्ती।[११]

कक्कोलकेषु यच्चितं तत् समीरणरूपकम् ।
इर्ष्या ह्यमोघसिद्धिः स्यादमोघो वायुसंभव ॥[१२]

सकलजगदर्थाश्चर्याः, तेषां पदं प्रतिष्ठां
कृत्वानुष्ठानज्ञानस्वभावोऽमोघसिद्धिः ।[१३]

सर्वसत्त्वार्थकार्याणां प्रसाधकतमः स्वयम् ।
अवन्ध्यं तन्महाज्ञानममोघसिद्धिरुच्यते ॥[१४]

अमोघः कर्म इत्युक्तं कुलान्येतानि संक्षिपेत् ।[१५]

सारङ्गः शीघ्रगामी क्षरलघुविषयस्त्रस्तचित्तोऽ
तिभीतोऽमोघसिद्धिरिति ।[१६]

ही (ह्रीः) कारान्वितः कृत्यानुष्ठानज्ञानं संस्कारस्कन्ध-
जनकोऽमोघ-सिद्धिः ।[१७]

तत्पुरुषोऽमोघसिद्धिः ।[१८]

मांसममोघसिद्धिः ।[१९]

अमोघसिद्धिः मृगः ।[२०]

शुक्ररुपिनः [अमोघसिद्धि][२१]

घनो अमोघसिद्धय ।[२२]

(ग) अमोघसिद्धि बुद्धया अभिषेक गाथा

श्रीवज्ररक्षवरयक्षसवज्रपाणि-
समुष्ठितानां च सहितस्य अमोघसिद्धेः ।
यत्मङ्गलं हितकरं परमार्थसिद्धेः
तत्मङ्गलं भवतु ते शान्तिकरन्तवाद्य ॥[२३]

अमोघसिद्धिरुपं ध्यात्वा
ओँ वज्राधिपतिस्त्वामभिषिञ्चामि तिष्ठ
वज्रसमयस्त्वामिति घण्ठावाम हस्तेनदध्यादिति ॥
घण्ठाभिषेक कृत्यानुष्ठानज्ञानं ॥[२४]

(घ) अमोघसिद्धि बुद्धया धारणी

ओँ नमो भगवते[२५] अमोघसिद्धय[२६] तथागतायार्हते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ सिद्धे २ सुसिद्धे[२७] २ परमसिद्धे[२८] सर्वार्थसिद्धे[२९] स्वाहा ॥

॥ इति आर्य्य अमोघसिद्धिनामधारणी समाप्त[३०] ॥

●

७) पञ्चबुद्धया धारणी

क) वैरोचन बुद्धया धारणी

ओँ नमो भगवते वैरोचनप्रभकेतुराजाय तथागतार्याहते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ शुक्ष्मे २ समे २ समये २ शान्ते २ दान्ते २ समारोपे अनारम्वतरम्वे यशोवति महातेजे निरालम्वे निराकूले निर्वाणे सर्वबुद्धाधिष्ठानाधिष्ठिते स्वाहा ॥

॥ इति वैरोचननामधारणी समाप्ता ॥

ख) अक्षोभ्य बुद्धया धारणी

ओँ नमो भगवते अक्ष्योभ्याय तथागतायार्हते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ कंकनि २ वाकनि २ रोचनि २ त्रोतनि २ प्रतिहत सर्वकर्म्मपरंपराणि सर्वसत्वानां च स्वाहा ।

॥ इति आर्य्य अक्षोभ्यनामधारणी समाप्ता ॥

ग) रत्नसम्भव बुद्धया धारणी

ओँ नमो भगवते रत्नकेतुराजाय तथागतार्याहते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ रत्ने २ महारत्ने रत्नसंभवे स्वाहा ।

॥ इति रत्नसंभवनामधारणी समाप्ता ॥

घ) अमिताभ बुद्धया धारणी

ओँ नमो भगवते अमिताभाय तथागतायार्हते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ अमिते २ अमितोद्भवे अमितसंभवे अमितसिद्धे

अमिततेजे अमितविक्रान्ते अमितगामिने अमितगगनकिर्त्तिकरे अमृतदुंदुभिस्वरे सर्वार्थसाधने सर्वकर्म्मक्लेशक्षयंकरि स्वाहा ।

॥ इति आर्य अमिताभधारणी समाप्ता ॥

ङ) अमोघसिद्धि बुद्धया धारणी

ओँ नमो भगवते अमोघसिद्धये तथागतायार्हते सम्यक्संबुद्धाय ॥ तद्यथा ॥ ओँ सिद्धे २ सुसिद्धे २ परमसिद्धे सर्वार्थसिद्धे स्वाहा ॥

॥ इति आर्य्य अमोघसिद्धिनामधारणी समाप्ता ॥

●

८) [पञ्चबुद्धया मङ्गल गाथा]

(पञ्चबुद्धया अभिषेक-मङ्गल गाथा)

यः सत्वरत्नवरधर्म्मसकर्म्मवज्री
मुद्रागणेन सहितस्य विपश्यकस्य ॥
वैरोचनस्य भवदुःख विनाशकस्य
तत्मङ्गलं भवतु शान्तिकरन्तवाद्य ॥[१]

यत्मङ्गलं कुलिशपाणिसवज्रराज-
श्रीवज्ररागवरसाधुसुसम्मतेन ॥
अक्षोभ्यराज सुगतस्य महासुखस्य
तत्मङ्गलं भवतु ते परमाभिषेकः ॥[२]

यत्मङ्गलं मणिभृतस्य जिनप्रभेण
सत्केतुनाच वरहासुभाषितेन ॥
श्रीरत्नसम्भवजिनस्य निषेवितस्य
तत्मङ्गलं भवतु ते परमाभिषेकः ॥[३]

यत्मङ्गलं कमलपाणि सवज्रतीक्ष्ण
चक्रायुधप्रवरभाव सधूतस्य तस्य ॥
लोकेश्वरस्य सुगतस्य सुखात्मकस्य
तत्मङ्गलं भवतु ते परमाभिषेकः ॥[४]

श्रीवज्ररक्षवरयक्षसवज्रपाणि
समुष्ठितानांच सहितस्य अमोघसिद्धः ॥
यत्मङ्गलं हितकरं परमार्थसिद्ध
तत्मङ्गलं भवतु शान्तिकरन्तवाद्य ॥[५]

[॥ इति क्रियासंग्रहोक्त पञ्चवुद्ध मङ्गल गाथा ॥][६]

९) पञ्चबुद्धयास्तोत्र-

[पञ्चजिनशरणस्तोत्रम्][1]

नमो बुद्धाय

मध्यगतविजयश्रीवैरोचनजिनवरं[2]
सिंहमासनस्थितश्वेतवर्णं
नमोस्तु नमोस्तु पञ्चजिनशरणं ॥१॥

पूर्वदिग्गतविजयश्रीअक्ष्योभ्यजिनवरं[3]
गजमासनस्थितनीलवर्णं
नमोस्तु नमोस्तु पञ्चजिनशरणं ॥२॥

दक्षिणदिग्गतविजयश्रीरत्नसम्भवजिनवरं
तुरंगमासनस्थितपीतवर्णं
नमोस्तु नमोस्तु पञ्चजिनशरणं ॥३॥

पश्चिमदिग्गतविजयश्रीअमिताभजिनवरं
मयूरमासनास्थितरक्तवर्णं
नमोस्तु नमोस्तु पञ्चजिनशरणं ॥४॥

उत्तरदिग्गतविजयश्रीअमोघसिद्धिजिनवरं
गरुडमासनस्थित श्यामवर्णं
नमोस्तु नमोस्तु मञ्चजिनशरणं ॥५॥

हरिहंरब्रम्हाशक्रनागयक्षसुरासुरैः[4]
वहुविविधउपहाराः[5] ढौकितम्[6]
नमोस्तु नमोस्तु पञ्चजिनशरणं ॥६॥

॥ इति पञ्चजिनशरणस्तोत्रम् ॥

[पञ्चबुद्धबीजाक्षरादिस्तोत्रम्][७]

ओं नमो बुद्धाय

ओंकारोत्पन्नशुक्लाभं मध्ये सिंहासनस्थितं[*]
बोध्यंगीमुद्रयायुत्तं वैरोचनमुनिं नमे ॥१॥

हूंकारोत्पन्ननीलाभं पूर्वे गजासनस्थितं
भूस्पर्शमुद्रयायुक्तं अक्षोभ्यं श्रीघनं नमे ॥२॥

त्रांकारोत्पन्नहेमाभं दक्षिणे अश्वमासनं
वरदसंयुत्तं बुद्धं नमामि रत्नसम्भवं ॥३॥

ह्रींकारोत्पन्नरक्ताभं पश्चिमे मयूरासनं
ध्यानमुद्राधरं नाथं अमिताभंमुनिं नमे ॥४॥

खंकारोत्पन्नश्यामाभं उत्तरे गरुडासनं
अभयमुद्रासंयुत्तं नमामि[१] अमोघसिद्धिं ॥५॥

लोचन्नामामकी चैव पाण्डरातारणी तथा
वन्ह्यादिकोणसंस्थितं चतुर्देवीं नमो नमः ॥६॥

निराकारं निरञ्जनं प्रत्यक्षज्योतिरुपिणं
चैत्यमध्ये स्थितं देवं वज्रसत्त्वं नमोस्तुते ॥७॥

॥ इति पञ्चबुद्धबीजाक्षरादि स्तोत्रं समाप्तम् ॥

[श्री धर्मधातु गीतम्][१०]

नमोबुद्धाय

अतसिकुसुमसंकाशदेहं[११] पूर्वमुखश्रीद्विरदासनं
दूरदांतकविघ्नविजितं नमामि[१२] श्रीअक्ष्योभ्यमूरुतिम् ॥१॥

सुगतस्मरणमहोरात्रं[१३] वरदकृतनरलोकेशं
मोक्षवांक्षितमानसं स्वामिचरणसंरत्नश्रीयं[१४] ॥२॥

दक्षिणमुखश्रीरत्नसम्भवं विभवसम्पदद्दायकं
उदितसुवर्णसंकाशदेहं[१५] नमामि[१६] श्रीतुरङ्गबाहनं ॥३॥

नवउदितरविकिरणदेहं[१७] योगमूरुतिधारितं[१८]
मयूरबाहनध्यानमूरुतिं[१९] नमामि श्रीअमिताभं ॥४॥

सप्तफणिमयालंकृतं[२०] हरितवर्णविराजितं
उत्तरमुखश्रीअमोघसिद्धिं[२१] नमामि श्रीगरुडवाहनं ॥५॥

इन्दुकुमुदविकाशदेहं[२२] त्रिदशभुवनप्रतिपालितं[२३]
सिंहवाहनध्यानमुरुतिं[२४] नमामि श्रीवैरोचनं ॥६॥

गगनविंदुकुमारबदनावत्सर श्री नैपालिकं
गीतग्रंथितकुसुममालां[२५] नमामि श्रीधर्मधातुं ॥७॥

॥ इति श्री धर्म्मधातुगीतं समाप्तम् ॥

[पञ्चबुद्ध भट्टारक वागीश्वरस्तोत्रम्][२६]

नमो बुद्धाय

मध्ये वैरोचनबुद्धं[२७] मध्यसमन्तभद्रकं[२८]
मध्ये सिंहासनपद्मं[२९] श्वतेवर्णं[३०] नमस्तुते ॥१॥

पूर्वे[३१] अक्ष्योभ्यसंभवं[३२] बज्रपाणिं[३३] महाबलं[३४] ।
गजवाहनं संपूर्ण[३५] नीलवर्णं[३६] नमस्तुते ॥२॥

दक्षिणे रत्नसंभवं[३७] रत्नपाणिं[३८] महातेजं[३९] ।
तुरंगवाहनं[४०] संपूर्णं[४१] पीतवर्णं[४२] नमस्तुते ॥३॥

पश्चिमे अमिताभं[४३] पद्मपाणिं[४४] कृपावतं[४५] ।
मयूरवाहन संपूर्णं[४६] रक्तवर्ण[४७] नमस्तुते ॥४॥

उत्तरे अमोघसिद्धि[४८] विश्वपाणिं[४९] विद्याधरं[५०] ।
गरुडवाहनं[५१] संपूर्ण[५२] श्यामवर्ण[५३] नमस्तुते ॥५॥

लोचनामामकीतारापाण्डुलायै नमस्तुते
वज्रसत्त्वं[५४] समध्यानं[५५] धर्मधातुं[५६] नमस्तुते ॥६॥

॥ इति श्री पञ्चवुद्धभट्टारकस्य वागीश्वरस्तोत्रम् ॥

[श्री चैत्यवन्दना स्तोत्रम्][५७]

नमो बुद्धाय

उतिमञ्जुश्री नेपालसंस्थितं[५८] आदिउभयस्थिरस्वयम्भूचैत्यं[५९]
त्रायत्रिंशतिकोटिदेवगणं[६०] प्रणमामि श्री धर्मधातुजिनालयं ॥१॥

नमामि बुद्धं त्रैलोक्यनाथं सकलजगद्गुरुँ
मामकीलोचनीपद्मनीतारापञ्चजिनधातुमण्डलं ॥२॥

बुद्धदशबलं[६१] नमोस्तु नित्यं पुण्यज्ञानगुणोदधिं
लोभमोहविषयनाशनं[६२] सर्वकार्य्यवाक्यसिद्धिदं ॥३॥

पूर्वमुखं[६३] श्रीहस्तिवाहनं[६४] इन्द्रनीलवर्णदेहं[६५]
अनेकदेवगणमारनिर्जितं[६६] वज्रासनं[६७] श्री अक्षोभ्यं[६८] ॥४॥

दक्षिणमुखं[६९] श्रीतुरङ्गवाहनं[७०] उदितसुवर्णदेहं[७१]
विविधरत्नसम्पन्नदायकं नमामि श्रीरत्नसम्भवं ॥५॥

पश्चिममुखं[७२] श्रीमयूरवाहनं[७३] पद्मरागज्योतिदेहं[७४]
अमिताभकरुणामयं[७५] सर्वलोकप्रतिपालितं ॥६॥

उत्तरमुखं[७६] श्रीगरुडवाहनं[७७] हरितवर्णदेहं[७८]
सप्तफणिमयालंकृतं[७९] अमोघसिद्धिविद्यादायकं ॥७॥

धर्मधातुमण्डलमाभ्के स्फटिकवर्णदेहं[८०]
सिंहवानं[८१] ध्यानमूर्तिं[८२] त्रैलोक्यनाथवैरोचनं ॥८॥

बुद्धबुद्धं स्मरणनित्यं क्षन्तिपदं[८३] सराजितं
जगतपालितकरुणामयं[८४] सर्वदेवगण शिरोमणिं[८५] ॥९॥

धर्मदान अचलकीर्ति[८६] भयेषु रक्षद्वीपसम्बरं
पापनाशनं[८७] बुद्धशरणं मुक्तिपदवरं देहि मे ॥१०॥

नमोस्तु स्वयम्भुचैत्यस्थापनं[८८] धर्मधातु रत्नचैत्यं[८९]
षोडशद्वारद्वात्रिंशल्लक्षणबुद्धं[९०] संपूर्ण स्थानकं ॥११॥

विविधरत्नवज्रलेपनं[९१] सुवर्णमुखछत्रसंपूर्ण
जन्मकोटिपापहरणं सुफलं[९२] भवतु अनुत्तरं ॥१२॥

वेदमुनिऋतुनेपालवत्सर फाल्गुणकृष्णसप्तमीं
चैत्यस्थापन यज्ञपूर्णं आयुआरोग्यसम्पदं ॥१३॥

॥ इति श्री चैत्यवन्दनास्तोत्रम् समाप्तम् ॥

पञ्चतथागतस्तोत्रम्

श्रीबुद्ध बुद्धाधिप बुद्धरूप बुद्धान्वितान् बोधयसे विबुद्धः ।
बुद्धया समस्तान् खलु बुद्धपुत्र सन्तोष्य योगेन तु बुद्धमेघाम् ॥१॥

श्रीवज्र वज्रामल जातवज्र वज्रेण दीप्तेन प्रदीप्य लोकम् ।
ददन् योगेन तु वज्रसंवर्ष वज्रात्मभावं कुरुषे सुवज्र ॥२॥

श्रीरत्न रत्नाकर रत्नमेघ रत्नेन रत्नं रमसे सुरत्न ।
विदार्य दारिद्र्यघनं जनानां सुतेजासा रत्नमहाध्वजेन ॥३॥

श्रीपद्म पद्मोत्तम पद्मसत्त्व पद्मान्समस्तान् खलुपद्मजालैः ।
विबोध्य पद्मोद्भवपद्मतोयैः पद्मे कुले स्थापयसे सुपद्म ॥४॥

श्रीविश्व विश्वाविश विश्वज्ञानं विश्वेन विश्वविषयेन लिप्त ।
विश्वेन सत्त्वान् विनयेषु विश्वं विद्यां सुविद्यां सुखपाचिता-
मिति ॥५॥

॥ श्रीपञ्चतथागतस्तोत्रम् समाप्तम् ॥

१०) नामसंगीतिइ पञ्चतथागतस्तुतिज्ञानगाथा:

सुविशुद्ध धर्मधातु ज्ञानगाथा

महावैरोचनो बुद्धो महामौनी महामुनिः ।
महामन्त्रनयोद्भूतो महामन्त्रनयात्मकः ॥१॥

दशपारमिताप्राप्तो दशपारमिताश्रयः ।
दशपारमिताशुद्धिर्दशपारमितानयः ॥२॥

दशभूमीश्वरो नाथो दशभूमिप्रतिष्ठितः ।
दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धधृक् ॥३॥

दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ।
अशेषविश्वार्थकरो दशाकारवशी महान् ॥४॥

अनादिर्निष्प्रपञ्चात्मा शुद्धात्मा तथतात्मकः ।
भूतवादी यथावादी तथाकारी अनन्यवाक् ॥५॥

अद्वयो द्वयवादी च भूतकोटिव्यवस्थितः ।
नैरात्म्यसिंहनिर्णादी कुतीर्थ्यमृगभीकरः ॥६॥

सर्वत्रगोऽमोघगतिस्तथागतमनोजवः ।
जिनो जितारिर्विजयो चक्रवर्ती महाबल : ॥७॥

गणमुख्यो गणाचार्यो गणेशो गणपतिर्वशी ।
महानुभावो धौरेयोऽनन्यनेयो महानयः ॥८॥

वागीशो वाक्पतिर्वाग्मी वाचस्पतिरनन्तगोः ।
सत्यवाक् सत्यवादी च चतुःसत्योपदेशकः ॥९॥

अवैवर्तिको ह्यनागामो खड्गः प्रत्येकनायकः ।
नानानिर्याणनिर्यातो महाभूतैककारणः ॥१०॥

अर्हन् क्षीणास्रवो भिक्षुर्वीतरागो जितेन्द्रियः ।
क्षेमप्राप्तोऽभयप्राप्तः शीतीभूतो ह्यनाविलः ॥११॥
विद्याचरणसंपन्नः सुगतो लोकवित्परः ।
निर्ममो निरहङ्कारः सत्यद्वयनय स्थितः ॥१२॥
संसारपारकोटिस्थः कृतकृत्यः स्थलस्थितः ।
कैवल्यज्ञाननिष्ठचूतः प्रज्ञाशस्त्रो विदारणः ॥१३॥
सद्धर्म्मो धर्मराड् भास्वान् लोकालोककरः परः ।
धर्मेश्वरो धर्मराजः श्रेयोमार्गोपदेशकः ॥१४॥
सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितः ।
निर्विकल्पोऽक्षयो धातुर्धर्मधातुः परोऽव्ययः ॥१५॥
पुण्यवान् पुण्यसंभारो ज्ञानं ज्ञानाकारं महत् ।
ज्ञानवान् सदसज्ज्ञानी संभारद्वयसंभृतः ॥१६॥
शाश्वतो विश्वराड् योगी ध्यानं ध्येयो धियांपतिः ।
प्रत्यात्मवेद्यो ह्यचलः परमाद्यस्त्रिकायधृक् ॥१७॥
पञ्चकायात्मको बुद्धः पञ्चज्ञानात्मको विभुः ।
पञ्चबुद्धात्ममुकुटः पञ्चचक्षुरसङ्गधृक् ॥१८॥
जनकः सर्वबुद्धानां बुद्धपुत्रः परोवरः ।
प्रज्ञाभवोद्भवो योनिर्धर्मयोनिर्भवान्तकृत् ॥१९॥
घनैकसारो वज्रात्मा सद्योजातो जगत्पतिः ।
गगनोद्भवः स्वयम्भूः प्रज्ञाज्ञानानलो महान् ॥२०॥
वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः ।
जगत्प्रदीपो ज्ञानोल्को महातेजाः प्रभास्वरः ॥२१॥
विद्याराजोऽग्रमन्त्रेशो मन्त्रराजो महार्थकृत् ।
महोष्णीषोऽद्भुतोष्णीषो विश्वदर्शी वियत्पतिः ॥२२॥

सर्वबुद्धात्मभावाग्र्यो जगदानन्दलोचनः ।
विश्वरूपो विधाता च पूज्यो मान्यो महाऋषिः ॥२३॥
कुलत्रयधरो मन्त्री महासमयमन्त्रधृक् ।
रत्नत्रयधरः श्रेष्ठस्त्रियानोत्तमदेशकः ॥२४॥
अमोघपाशो विजयी वज्रपाशो महाग्रहः ।
वज्राङ्कुशो महापाशः,

॥ इति सुविशुद्धधर्मधातुज्ञानथागाः पादोनपञ्चविंशतिः ॥

आदर्शज्ञानगाथा

वज्रभैरवभीकरः ॥
क्रोधराट् षण्मुखो भीमः षण्णेत्रः षड्भुजो बली ।
दंष्ट्राकरालः कङ्कालो हलाहलः शताननः ॥१॥
यमान्तको विघ्नराजो वज्रवेगो भयङ्करः ।
विघुष्टवज्रो हृद्वज्रो मायावज्रो महोदरः ॥२॥
कुलिशेशो वज्रयोनिर्वज्रमण्डो नभोपमः ।
अचलैकजटाटोपो गजचर्मपटार्द्रधृक् ॥३॥
हाहाकारो महाघोरो हीहीकारो भयानकः ।
अट्टहासो महाहासो वज्रहासो महारवः ॥४॥
वज्रसत्त्वो महासत्त्वो वज्रराजो महासुखः ।
वज्रचण्डो महामोदो वज्रहूँकारहूँकृतिः ॥५॥
वज्रबाणायुधधरो वज्रखड्गो निकृन्तनः ।
विश्ववज्रधरो वज्री एकवज्री रणञ्जहः ॥६॥
वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः ।
वज्रावेशो महावेशः शताक्षो वज्रलोचनः ॥७॥

वज्ररोमाङ्कुरतनुर्वज्ररोमैकविग्रहः ।
वज्रकोटिनखारम्भो वज्रसारघनच्छविः ॥८॥
वज्रमालाधरः श्रीमान् वज्राभरणभूषितः ।
हाहाट्टहासो निर्घोषो वज्रघोषः षडक्षरः ॥९॥
मञ्जुघोषो महानादस्त्रैलोक्यैकरवो महान् ।
आकाशधातुपर्यन्तघोषो घोषवतां वरः ॥१०॥

॥ इत्यादर्शज्ञानगाथाः पादेन सार्धं दश ॥

प्रत्यवेक्षणागाथा

तथताभूतनैरात्म्यभूतकोटिरनक्षरः ।
शून्यतावादिवृषभो गम्भीरोदारगर्जनः ॥१॥
धर्मशङ्खो महाशब्दो धर्मगण्डी महारणः ।
अप्रतिष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभिः ॥२॥
अरूपो रूपवानग्र्यो नानारूपो मनोमयः ।
सर्वरूपावभासश्रीरशेषप्रतिबिम्बधृक् ॥३॥
अप्रधृष्यो महेशाख्यस्त्रैधातुकमहेश्वरः ।
समुच्छ्रितार्यमार्गस्थो धर्मकेतुर्महोदयः ॥४॥
त्रैलोक्यैकमुमाराङ्गः स्थविरो वृद्धः प्रजापतिः ।
द्वात्रिंशल्लक्षणधरः कान्तस्त्रैलोक्यसुन्दरः ॥५॥
लोकज्ञानगुणाचार्यो लोकाचार्यो विशारदः ।
नाथस्त्राता त्रिलोकाप्तः शरणं तायनुत्तरः ॥६॥
गगनाभोगसम्भोगः सर्वज्ञज्ञानसागरः ।
अविद्याण्डकोशभेत्ता भवपञ्जरदारणः ॥७॥

शमिताशेषसंक्लेशः संसारार्णवपारगः ।
ज्ञानाभिषेकमुकुटः सम्यक्संबुद्धभूषणः ॥८॥

त्रिदुःखदुःखशमनस्त्र्यन्तोऽनन्तस्त्रिमुक्तिगः ।
सर्वावरणनिर्मुक्त आकाशसमतांगतः ॥९॥

सर्वक्लेशमलातीतस्त्र्यध्वानध्वगतिंगतः ।
सर्वसत्त्वमहानागो गुणशेखरशेखरः ॥१०॥

सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः ।
महाचिन्तामणिधरः सर्वरत्नोत्तमो विभुः ॥११॥

महाकल्पतरुः स्फीतो महाभद्रघटोत्तमः ।
सर्वसत्त्वार्थकृत्कर्त्ता हितैषी सत्त्ववत्सलः ॥१२॥

शुभाशुभज्ञः कालज्ञः समयज्ञः समयी विभुः ।
सत्त्वेन्द्रियज्ञो वेलज्ञो विमुक्तित्रयकोविदः ॥१३॥

गुणी गुणज्ञो धर्मज्ञः प्रशस्तो मङ्गलोदयः ।
सर्वमङ्गलमाङ्गल्यः कीर्तिर्लक्ष्मीर्यशः शुभः ॥१४॥

महोत्सवो महाश्वासो महानन्दो महारतिः ।
सत्कारः सत्कृतिर्भूतिः प्रमोदः श्रीर्यशस्पतिः ॥१५॥

वरण्यो वरदः श्रेष्ठः शरण्यः शरणोत्तमः ।
महाभयारिः प्रवरो निःशेषभयनाशनः ॥१६॥

शिखी शिखण्डी जटिलो जटी मौण्डी किरीटिमान् ।
पञ्चाननः पञ्चशिखः पञ्चचीरकशेखरः ॥१७॥

महाव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः ।
महातपास्तपोनिष्ठः स्नातको गौतमोऽग्रणीः ॥१८॥

ब्रह्मविद् ब्राह्मणो ब्रह्मा ब्रह्मनिर्वाणमाप्तवान् ।
मुक्तिर्मोक्षो विमोक्षाङ्गो विमुक्तिः शान्तता शिवः ॥१९॥

निर्वाणो निवृतिः शान्तिः श्रेयोनिर्याणमन्तगः ।
सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः ॥२०॥

अजयोऽनुपमोऽव्यक्तो निराभासो निरञ्जनः ।
निष्कलः सर्वगो व्यापी सूक्ष्मो बीजमनाश्रवः ॥२१॥

अरजो विरजो विमलो वान्तदोषो निरामयः ।
सुप्रबुद्धो विबुद्धात्मा सर्वज्ञः सर्ववित्परः ॥२२॥

विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृक् ।
निर्विकल्पो निराभोगस्त्र्यध्वसंबुद्धकार्यकृत् ॥२३॥

अनादिनिधनो बुद्ध आदिबुद्धो निरन्वयः ।
ज्ञानैकचक्षुरमलो ज्ञानमुर्तिस्तथागतः ॥२४॥

वागीश्वरो महावादी वादिराट् वादिपुङ्गवः ।
वदतांवरो वरिष्ठो वादिसिंहोऽपराजितः ॥२५॥

समन्तदर्शी प्रामोद्यस्तेजोमाली सुदर्शनः ।
श्रीवत्सः सुप्रभो दीप्तिर्भाभासुरकरद्युतिः ॥२६॥

महाभिषग्वरः श्रेष्ठः शल्यहर्ता निरुत्तरः ।
अशेषभैषज्यतरुः क्लेशव्याधिर्महारिपुः ॥२७॥

त्रैलोक्यतिलकः कान्तः श्रीमान् नक्षत्रमण्डलः ।
दशदिग्व्योमपर्य्यन्तो धर्मध्वजमहोच्छ्रयः ॥२८॥

जगच्छत्रैकविपुलो मैत्रीकरुणमण्डलः ।
पद्मनृत्येश्वरः श्रीमान् रत्नच्छत्रो महाविभुः ॥२९॥

सर्वबुद्धमहाराजः सर्वबुद्धात्मभावधृक् ।
सर्वबुद्धमहायोगः सर्वबुद्धैकशासनः ॥३०॥

वज्ररत्नाभिषेकश्रीः सर्वरत्नाधिपेश्वरः ।
सर्वलोकेश्वरपतिः सर्ववज्रधराधिपः ॥३१॥

सर्वबुद्धमहाचित्तः सर्वबुद्धमनोगतिः ।
सर्वबुद्धमहाकायः सर्वबुद्धसरस्वति ॥३२॥

वज्रसूर्य्यमहालोको वज्रेन्दुविमलप्रभः ।
विरागादिमहारागो विश्ववर्णोज्वलप्रभः ॥३३॥

सम्बुद्धवज्रपर्यक्लो बुद्धसङ्गीतिधर्मधृक् ।
बुद्धपद्मोद्भवः श्रीमान् सर्वज्ञज्ञानकोषधृक् ॥३४॥

विश्वमायाधरो राजा बुद्धविद्याधरो महान् ।
वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षरः ॥३५॥

दुःखच्छेदमहायानवज्रधर्ममहायुधः ।
जिनजिग् वज्रगाम्भीर्यो वज्रबुद्धिर्यथार्थवित् ॥३६॥

सर्वपारमितापूरी सर्वभूमिविभूषणः ।
विशुद्धधर्मनैरात्म्यः सम्यग्ज्ञानेन्दुहृत्प्रभः ॥३७॥

मायाजालमहोद्योगः सर्वतन्त्राधिपः परः ।
अशेषवज्रपर्यङ्को निःशेषज्ञानकायधृक् ॥३८॥

समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धतिः ।
सर्वबुद्धमहागर्भो विश्वनिर्माणचक्रधृक् ॥३९॥

सर्वभावस्वभावाग्रः सर्वभावस्वभावधृक् ।
अनुत्पादधर्म विश्वार्थ सर्वधर्मस्वभावधृक् ॥४०॥

एकक्षणमहाप्राज्ञः सर्वधर्मावबोधधृक् ।
सर्वधर्माभिसमुयो भूतान्तमुनिरग्रधीः ॥४१॥

स्तिमितः सुप्रसन्नात्मा सम्यक्संबुद्धबोधिधृक् ।
प्रत्यक्षः सर्वबुद्धानां ज्ञानार्चिः सुप्रभास्वरः ॥४२॥

॥ इति प्रत्यवेक्षणज्ञानगाथाः द्वाचत्वारिंशत् ॥

इष्टार्थसाधकः परः सर्वापायविशोधकः ।
सर्वसत्त्वोत्तमो नाथः सर्वसत्त्वप्रमोचकः ॥१॥
क्लेशसंग्रामशूरैकः अज्ञानरिपुदर्पहा ।
धीश्रृङ्गारधरः श्रीमान् वीरबीभत्सरूपधृक् ॥२॥
बाहुदण्डशताक्षेपपदनिक्षेपनर्त्तनः ।
श्रीमच्छतभुजाभोगगगनाभोगनर्त्तनः ॥३॥
एकपादतलाक्रान्तमहीमण्डतले स्थितः ।
ब्रह्माण्डशिखराक्रान्तपादाङ्गुष्ठनखे स्थितः ॥४॥
एकार्थोऽद्वयधर्मार्थः परमार्थोऽविनश्वरः ।
नानाविज्ञप्तिरूपार्थश्चित्तविज्ञानसंततिः ॥५॥
अशेषभावार्थरतिः शून्यतारतिरग्रधीः ।
भवरागाद्यतीतश्च भवत्रयमहारतिः ॥६॥
शुद्धः शुभ्राभ्रधवलः शरच्चन्द्रांशुसुप्रभः ।
बालार्कमण्डलच्छायो महारागनखप्रभः ॥७॥
इन्द्रनीलाग्रसच्चीरो महानीलकचाग्रधृक् ।
महामणिमयूखश्रीर्बुद्धनिर्वाणभूषणः ॥८॥
लोकधातुशताकम्पी ऋद्धिपादमहाक्रमः ।
महास्मृतिधरस्तत्त्वश्चतुःस्मृतिसमाधिराट् ॥९॥
बोध्यङ्गकुसुमामोदस्तथागतगुणोदधिः ।
अष्टाङ्गमार्गनयवित् सम्यक्संबुद्धमार्गवित् ॥१०॥
सर्वसत्त्वमहासङ्गो निःसङ्गो गगनोपमः ।
सर्वसत्त्वमनोजातः सर्वसत्त्वमनोहरः ॥११॥

सर्वसत्त्वेन्द्रियार्थज्ञः सर्वसत्त्वमनोहरः ।
पञ्चस्कन्धार्थतत्त्वज्ञः पञ्चस्कन्धविशुद्धधृक् ॥१२॥

सर्वनिर्याणकोटिस्थः सर्वनिर्याणकोविदः ।
सर्वनिर्याणमार्गस्थः सर्वनिर्याणदेशकः ॥१३॥

द्वादशाङ्गभवोत्खातो द्वादशाकारशुद्धधृक् ।
चतुःसत्यनयाकारो अष्टज्ञानावबोधधृक् ॥१४॥

द्वादशाकारसत्यार्थः षोडशाकारतत्त्ववित् ।
विंशत्याकारसंबोधिर्विबुद्धः सर्ववित्परः ॥१५॥

अमेयबुद्धनिर्माणकायकोटिविभावकः ।
सर्वक्षणाभिसमयः सर्वचित्तक्षणार्थवित् ॥१६॥

नानायाननयोपायजगदर्थविभावकः ।
यानत्रितयनिर्यात एकयानफले स्थितः ॥१७॥

क्लेशधातुविशुद्धात्मा कर्मधातुक्षयङ्करः ।
ओघोदधिसमुत्तीर्णो योगकान्तारनिसृतः ॥१८॥

क्लेशोपक्लेशसंक्लेशसुप्रहीणसवासनः ।
प्रज्ञोपायमहाकरुणा अमोघजगदर्थकृत् ॥१९॥

सर्वसंज्ञाप्रहोणार्थो विज्ञानार्थो निरोधकृत् ।
सर्वसत्त्वमनोविषयः सर्वसत्त्वमनोगतिः ॥२०॥

सर्वसत्त्वमनोऽन्तस्थस्तच्चित्तसमताङ्गतः ।
सर्वसत्त्वमनोल्हादी सर्वसत्त्वमनोरतिः ॥२१॥

सिद्धान्तो विभ्रमापेतः सर्वभ्रान्तिविवर्जितः ।
निःसंदिग्धमतिस्त्र्यर्थः सर्वार्थस्त्रिगुणात्मकः ॥२२॥

पञ्चस्कन्धार्थस्त्रिकालः सर्वक्षणविभावकः ।
एकक्षणाभिसंबुद्धः सर्वबुद्धस्वभावधृक् ॥२३॥

अनङ्गकायः कायाग्र्यः कायकोटिविभावकः ।
अशेषरूपसन्दर्शी रत्नकेतुर्महामणिः ॥२४॥

॥ इति समताज्ञानगाथाश्चतुर्विंशतिः ॥

कृत्यानुष्ठानज्ञानगाथा

सर्वसंबुद्धबोद्धव्यो बुद्धबोधिरनुत्तरः ।
अनक्षरो मन्त्रयोनिर्महामन्त्र कुलत्रयः ॥१॥
सर्वमन्त्रार्थजनको महाबिन्दुरनक्षरः ।
पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षरः ॥२॥
सर्वाकारो निराकारः षोडशार्धार्धबिन्दुधृक् ।
अकलः कलनातीश्चतुर्थध्यानकोटिधृक् ॥३॥
सर्वध्यानकलाभिज्ञः समाधिकुलगोत्रवित् ।
समाधिकायः कायाग्र्यः सर्वसंभोगकायराट् ॥४॥
निर्माणकायः कायाग्र्यो बुद्धनिर्माणवंशधृक् ।
दशदिग्विश्वनिर्माणो यथावज्जगदर्थकृत् ॥५॥
देवातिदेवो देवेन्द्रः सुरेन्द्रो दानवाधिपः ।
अमरेन्द्रः सुरगुरुः प्रमथः प्रमथेश्वरः ॥६॥
उत्तीर्णभवकान्तार एकः शास्ता जगद्गुरुः ।
प्रख्यातदशदिग्लोकों धर्मदानपतिर्महान् ॥७॥
मैत्रीसन्नाहसन्नद्धः करुणावर्मवर्मितः ।
प्रज्ञाखड्गो धनुर्वाणः क्लेशाज्ञानरणञ्जहः ॥८॥
मारारिर्मारजिद्वीरश्चतुर्मारभयान्तकृत् ।
सर्वमारचमूजेता सम्बद्धो लोकनायकः ॥९॥
वन्द्यः पूज्योऽभिवाद्यश्च माननीयश्च नित्यशः ।
अर्चनीयतमो मान्यो नमस्यः परमो गुरुः ॥१०॥

त्रैलोक्यैकक्रमगतिर्व्योमपर्य्यन्तविक्रमः ।
त्रैविद्यः श्रोत्रियःपूतः षडभिज्ञः षडनुस्मृतिः ॥११॥
बोधिसत्त्वो महासत्त्वो लोकातीतो महर्द्धिकः ।
प्रज्ञापारमितानिष्ठः प्रज्ञातत्त्वत्वमागतः ॥१२॥
आत्मवित्परवित्सर्वः सर्वीयो ह्यग्रपुद्गलः ।
सर्वोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः ॥१३॥
धर्मदानपतिः श्रेष्ठश्चतुर्मुद्रार्थदेशकः ।
पर्युपास्यतमो जगतां निर्याणत्रययायिनाम् ॥१४॥
परमार्थविशुद्धश्रीस्त्रैलोक्यसुभगो महान् ।
सर्वसम्पत्करः श्रीमान् मञ्जुश्रीः श्रीमतांवर ॥१५॥

॥ इति कृत्यानसुष्ठानज्ञानगाथा पञ्चदश ॥

पञ्चतथागतज्ञानस्तुतिगाथा

नमस्ते वरदवज्राग्र भूतकोटे नमोऽस्तु ते ।
नमस्ते शून्यतागर्भ बुद्धबोधे नमोस्तु ते ॥१॥
बुद्धराग नमस्तेऽस्तु बुद्धकाम नमो नमः ।
बुद्धप्रीते नमस्तुभ्यं बुद्धमोद नमो नमः ॥२॥
बुद्धस्मित नमस्तुभ्यं बुद्धहास नमो नमः ।
बुद्धवाच नमस्तुभ्यं बुद्धभाव नमो नमः ॥३॥
अभवोद्भवं नमस्तुभ्यं नमस्ते बुद्धसंभव ।
गगनोद्भव नमस्तुभ्यं नमस्ते ज्ञानसंभव ॥४॥
मायाजाल नमस्तुभ्यं नमस्ते बुद्धनाटक ।
नमस्ते सर्वसर्वेभ्यो ज्ञानकाय नमोस्तु ते ॥५॥

॥ इति पञ्चतथागतज्ञानस्तुथिगाथाः पञ्च ॥

श्री गुह्यसमाजतन्त्रे सर्वतथागतसमाधि-मण्डलाधिष्ठानपटलः प्रथमः

एवं मया श्रुतम्। एकस्मिन् समये भगवान् सर्ततथागतकायवाक्चित्तहृदय-वज्रयोषिद्भगेषु विजहार। अनभिलाप्यानभिलाप्यैः सर्वबुद्धक्षेत्रसुमेरुपरमाणुरजःसमैर्बोधिसत्त्वैर्महासत्त्वैः। तद्यथा। समयवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। कायवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। वाग्वजेण च नाम बोधिसत्त्वेन महासत्त्वेन। चित्तपजेण च नाम वोधिसत्त्वेन महासत्त्वेन। समाधिवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। जपवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। पृथिवीवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। अब्वज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन। तेजोवज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन। वायुवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। आकाशवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। रूपवज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन। शब्दवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। गन्धवज्रेण च नाम बोधिसत्त्वेन महासत्त्वेन। रसवज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन। स्पर्शवज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन। धर्मधातुवज्रेण च नाम वोधिसत्त्वेन महासत्त्वेन।

एवंमुखैरनभिलाप्यानभिलाप्यैसर्वबुद्धक्षेत्रसुमेरुपरमाणुरजः-समैर्वोधिसत्त्वैर्महासत्त्वैराकाशधातुसमाध्मातैश्च तथागतैः। तद्यथा। अक्षोभ्यवज्रेण च नाम तथागतेन। वैरोचनवज्रेण च नाम तथागतेन। रन्तकेतुवज्रेण च नाम तथागतेन। अमितवज्रेण च नाम तथागतेन। अमोघवज्रेण च नाम तथागतेन।

एवं प्रमुखैः सर्वाकाशधातुसमाध्मातैश्च तथागतैः। तद्यथा। अपि नाम तिलबिम्बमिव परिपूर्णः सर्वाकाशधातुः सर्वतथागतैः संदश्यते स्म।

अथ भगावन् महावैरोचनस्तथागतः सर्वतथागतमहारागवज्रं नाम समाधिं समापन्नः तं सर्वतथागतव्यूहं स्वकायवाकचित्तवज्रेषु प्रवेशयामास। अथ ते सर्वतथागता भगवतः सर्वतथागतकायवाक्-चित्तवज्राधिपतेः परितोषणार्थं स्वबिम्बानि स्त्रीबिम्बान्यभिनिर्माय भगवतो वैरोचनस्य कायादभिनिष्क्रान्ता अभूवन्। तत्र केचित् बुद्धलोचनाकारेण केचित् मामक्याकारेण केचित् पाण्डरवासिन्याकारेण केचित् समयताराकारेण संस्थिता अभूवन्। तत्र केचित् रूपस्वभावाकारेण केचित् शब्दस्वभावाकारेण केचित् गन्धस्वभावाकारेण केचित् स्पर्शस्वभावाकारेण संस्थिता अभूवन्।

अथ खलु अक्षोभ्यस्तथागतः सर्वतथागतकायवाक्चित्तहृदय-वज्रयोषिद्भगेषुचतुरस्रं विरजस्कं महासमयमण्डलमधिष्ठापयामास।

स्वच्छं च तत्स्वभावं च नानारूपं समन्ततः।
बुद्धमग्नि समाकीर्णं स्फुलिङ्गगहनज्वलम्।
स्वच्छादिमण्डलैर्युक्तं सर्वताथागतं पुरम्॥१॥

अथ भगवान् सर्वतथागतकायवाक्चित्तवज्राधिपतिः सर्वतथागतमण्डलमध्ये प्रतिष्ठापयामास। अथ खलु अक्षोभ्यस्तथागतः रत्नकेतुस्तथागतः अमितायुस्तथागतः अमोघसिद्धिस्तथागतः वैरोचनस्तथागतः बोधिचित्तवज्रस्य तथागतस्य हृदये विजहार।

अथ भगवान् बोधिचित्तवज्रस्तथागतः सर्वतथागताभि-

भवनवज्रं नाम समाधिं समापन्नः। समनन्तरसमापन्नस्य च सर्वतथागताधिपतेः अथायं सर्वाकाशधातुः सर्वतथागतवज्रमयः संस्थितोऽभूत्। अथ यावन्तः सर्वाकाशधातुसंस्थिताः सर्वसत्त्वा सर्वे च तेन वज्रसत्त्वाधिष्ठानेन सर्वतथागतसुखसौमनस्य-लाभिनोऽभूवन्।

अथ भगवान् बोधिचित्तवज्रस्तथागतः सर्वतथागत-कायवाक्चित्त-वज्रसमयोद्भववज्रं नाम समाधिं समापद्येमां महाविद्यापुरुषमूर्ति सर्वतथागत-सत्त्वाधिष्ठानमधिष्ठापयामास। समनन्तराधिष्ठितमात्रे स एव भगवान् बोधिचित्तवज्रस्तथागत-स्त्रिमुखाकारेण सर्वतथागतैः सन्दृश्यते स्म।

अथ अक्षोभ्यप्रमुखाः सर्वतथागता भगवतो बोधिचित्तवज्रस्य हृदयादभिनिष्क्रम्य इदमुदानमुदानयामासुः–

अहो हि सर्वबुद्धानां बोधिचित्तप्रवर्तनम्।
सर्वताथागतं गुह्यं अप्रतर्क्यमनाविलम् ॥२॥ इति ॥

अथ भगवन्तः सर्वतथागताः पुनः समाजमागम्य भगवन्तं बोधिचित्तवज्रं सर्वतथागतपूजास्फरणसमयतत्त्वरत्नमेघैः सम्पूज्य प्रणिवत्यैवमाहुः–

भाषस्व भगवन् तत्त्वं वज्रसारसमुच्चयं।
सर्वताथागतं गुह्यं समाजं गुह्यसम्भवम् ॥३॥ इति ॥

अथ भगवान् बोधिचित्तवज्रस्तथागतस्तान् सर्वतथागतान् एवमाह। साधु साधु भगवन्तः सर्वतथागताः। किन्तु सर्वतथागतानामपि संशयकरोऽयं कुतोऽन्येषां वोधिसत्त्वानामिति।

अथ भगवन्तः सर्वतथागताः आश्चर्यप्राप्ताः अद्‌भुतप्राप्ताः। सर्वतथागत संशयच्छेत्तारं भगवन्तं सर्वतथागतस्वामिनं पप्रच्छुः। यद्भगवानेवंगुणविशिष्टेऽपि सर्वतथागतपर्षदि सर्वतथागत-कायवाक्चित्तगुह्यं निर्देष्टुं नोत्सहते तद्भगवान् सर्वतथागताधिष्ठानं कृत्वा सर्वतथागतवज्रसमयसम्भवपदैः सर्वतथागतानां सुखसौमनस्यानुभावनार्थं यावत्सर्वतथागत-ज्ञानाभिज्ञा-वाप्तिफलहेतोः संप्रकाशयत्विति।

अथ भगवान् सर्वतथागतकायवाक्चित्तवज्रस्तथागतः सर्वतथागताध्येषणां विदित्वा ज्ञानप्रदीपवज्रं नाम समाधिं समापद्येदं द्वेषकुलपरमसारहृदयं-स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास॥ वज्रधृक्॥ अथास्मिन् भाषितमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषः अक्षोभ्यमहामुद्रासंयोगपरमपदैः कृष्णासितरक्ताकारेण सर्वतथागतकायवाक्चित्तवज्रस्य सर्वतथागतकायवाक्चित्तवज्रे निषीदयामास।

अथ भगवान् सर्वतथागतसमयसम्भववज्रं नाम समाधिं समापद्येदं मोहकुलपरमसारहृदयं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास॥ जिनजिक्॥ अथास्मिन् भाषितमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषो वैरोचनमहा-मुद्रासंयोगपरमपदैः सितकृष्णरक्ताकारेण सर्वतथागतकायवाक्-चित्तवज्रस्य पुरतो निषीदयामास।

अथ भगवान् सर्वतथागतरत्नसम्भववज्रश्रियं नाम समाधिं समापद्येदं चिन्तामणिकुलपरमसारहृदयं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास। रत्नधृक्। अथास्मिन् भाषितमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषो रत्नकेतुमहामुद्रा

संयोगपरमपदैः पीतसितकृष्णाकारेण सर्वतथागतकायवाक्-चित्तवज्रस्य दक्षिणे निषीदयामास ।

अथ भगवान् सर्वतथागतमहारागसम्भववज्रं नाम समाधिं समापद्येदं वज्ररागकुल परमसारहृदयं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ आरोलिक् ॥ अथास्मिन् भाषितमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषो लोकेश्वर-महाविद्याधिपतिमहामुद्रासंयोगपरमपदै रक्तसितकृष्णाकारेण सर्वतथागतकायवाक्चित्तवज्रस्य पृष्ठतो निषीदयामास ।

अथ भगवान् सर्वतथागतामोघसमयसम्भववज्रं नाम समाधिं समापद्येदं समयाकर्षणकुलपरमसारहृदयं स्वकायवाक्चित्तबज्रेभ्यो निश्चारयामास ॥ प्रज्ञाधृक् ॥ अथास्मिन् भाषितमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्त-विद्यापुरुषोऽमोघवज्रमहामुद्रा-संयोगपरमपदैः हरितसितकृष्णाकारेण सर्वतथागतकायवाक्चित्त-वज्रस्य उत्तरे निषीदयामास ।

द्वेषमोहस्तथारागश्चिन्तामणिसमयस्तथा ।
कुला ह्येते तु वै पञ्च काममोक्षप्रसाधकाः ॥४॥ इति ॥

अथ भगवान् सर्वतथागतवज्रधरानुरागणसमयं नाम समाधिं समापद्येमां सर्ववज्रधराग्रमहिषी स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ द्वेषरति ॥ अथास्यां विनिःसृतमात्रायां स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषः स्त्रीरूपधरो भूत्वा [सर्वतथागतकायवाक्चित्तवज्रे] निषीदयामास ।

अथ भगवान् सर्वतथागतानुरागणवज्रं नाम समाधिं समापद्येमां सर्वतथागताग्रमहिषीं स्वकायवाक्चित्तवज्रेभ्यो

निश्चारयामास । मोहरति ॥ अथास्यां विनिःसृतमात्रायां स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषः स्त्रीरूपधरो भूत्वा पूर्वकोणे निषीदयामास ।

[अथ भगवान् सर्वतथागतरत्नधरानुरागणवज्रं नाम समाधिं समापद्येमां सर्वेर्ष्याधराग्रमहिषी स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ ईर्ष्यारति ॥ अथास्यां विनिःसृतमात्रायां स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषः स्त्रीरूपधरो भूत्वा दक्षिणकोणे निषीदयामास]

अथ भगवान् सर्वतथागतरागधरानुरागणवज्रं नाम समाधिं समापद्येमां सर्वरागधराग्रमहिषीं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास । रागरति ॥ अथास्यां विनिःसृतमात्रायां स एव भगवान् सर्वतथागतकायवाक्चित्तविद्यापुरुषः स्त्रीरूपधरो भूत्वा पश्चिमकोणे निषीदयामास ।

अथ भगवान् सर्वतथागतकायवाक्चित्तविसम्वादनवज्रं नाम समाधिं समापद्येमां सर्वतथागतप्रज्ञाधराग्रमहिषीं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ वज्ररति ॥ अथास्या विनिःसृतमात्रायां स एव भगवान् सर्वतथागतकायवाक्चित्त-विद्यापुरुषः स्त्रीरूपधरो भूत्वा उत्तरकोणे निषीदयामास ।

अथ भगवान् महावैरोचनवज्रं नाम समाधिं समापद्येदं सर्वतथागत-मण्डलाधिष्ठानं नाम महाक्रोधं स्वकायवाक्चित्त-वज्रेभ्यो निश्चारयामास ॥ यमान्तकृत् ॥ अथास्मिन् विनिःसृतमात्रे स एव भगवान् सर्वतथागतकाय-वाक्चित्तविद्यापुरुषः संर्वतथागतसन्त्रासनाकारेण पूर्वद्वारे निषीदयामास ।

अथ भगवान् सर्वतथागताभिसम्बोधिवज्रं नाम समाधिं समापद्येमं सर्वतथागतमण्डलाधिष्ठानं नाम महाक्रोधं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ प्रज्ञान्तकृत् ॥ अथास्मिन् विनिःसृतमात्रे स एव भगवान् सर्वतथागतकायवाक्चित्त-विद्यापुरुषो वज्रसमयसन्त्रासनाकारेण दक्षिणद्वारे निषीदयामास ।

अथ भगवान् सर्वतथागतधर्मवशङ्करिं नाम समाधिं समापद्येमं सर्वतथागतरागधरमण्डलाधिष्ठानं नाम महाक्रोधं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ पद्मान्तकृत् । अथास्मिन् विनिःसृतमात्रे स एव भगवान् सर्वतथागत कायवाक्चित्तविद्यापुरुषः सर्वतथागतवागाकारेण पश्चिमद्वारे निषीदयामास ।

अथ भगवान् सर्वतथागतकायवाक्चित्तवज्रं नाम समाधि समापद्येमं सर्वतथागतकायवाक्चित्तमण्डलाधिष्ठानं नाम महाक्रोधं स्वकायवाक्चित्तवज्रेभ्यो निश्चारयामास ॥ विघ्नान्तकृत् ॥ अथास्मिन् विनिःसृतमात्रे स एव भगवान् सर्वतथागत-कायवाक्चित्तविद्यापुरुषः सर्वतथागतकायवाक्चित्ताकारेण उत्तरद्वारे निषीदयामास ।

सर्वतथागतकायवाक्चित्तसम्भाषणमण्डलसमयसत्त्वाः ।

इति श्री सर्वतथागतकायवाक्पचित्तरहस्यातिरहस्ये गुह्यसमाजे महागुह्यतन्त्रराजे सर्वतथागतसमाधिमण्डलाः-धिष्ठानपटलः प्रथमोऽध्यायः ।

श्री गुह्यसमाजतन्त्रे बोधिचित्त पटलो द्वितीयः

अथ भगवन्तः सर्वतथागताः भगवतः सर्वतथागतकाय-वाक्चित्ताधिपतेः पूजा कृत्वा प्रणिपत्यैवमाहुः-

भाषस्व भगवन् सारं कायवाक्चित्तमुत्तमम् ।
सर्वतथागतं गुह्यं बोधिचित्तमनुत्तरम् ॥१॥

अथ भगवान् सर्वतथागतकायवाक्चित्तवज्रस्तथागतः सर्वतथागतानामध्येषणां विदित्वा सर्वबोधिसत्त्वानां चेतसैव चित्तपरिवितर्कमाज्ञाय बोधिसत्त्वानेवं आह । उत्पादयन्तु भवन्तः चित्तं कायाकारेण कायं चित्ताकारेण चित्तं वाक्प्रव्याहारेणेति ।

अथ ते महाबोधिसत्त्वाः सर्वतथागतकायवाक्-चित्ताकाशाकारेण संयोज्य इदमुदानमुदानयामासुः–

अहो हि समन्तभद्रस्य कायवाक्चित्तवज्रिणः ।
अनुत्पादप्रयोगेण उत्पादोऽयं प्रगीयते ॥२॥

अथ भगवान् सर्वतथागतकायवाक्चित्तवज्रस्तथागतः सर्वतथागताभि-सम्बोधिनयवज्रं नाम समाधिं समापद्येदं बोधिचित्तमुदाजहार–

अभावे भावनाभावो भावना नैव भावना ।
इति भावो न भाव स्याद् भावना नोपलभ्यते ॥३॥
इत्याह भगवान् सर्वतथागतकायवाक्चित्तवज्रस्तथागतः ।

अथ भगवान् वैरोचनवज्रस्तथागतः सर्वतथागताभिसमयवज्रं नाम समाधिं समापद्येदं बोधिचित्तमुदाजंहार । सर्वभावविगत स्कन्धधात्वायतन-ग्राह्यग्राहकवर्जितं धर्मनैरात्म्यसमतया स्वचित्तमाद्यनुत्पन्नं शून्यताभावम् । इत्याह भगवान् वैरोचनवज्रस्तथागतः ।

अथ भगवान् अक्षोभ्यवज्रस्तथागतः सर्वतथागताक्षयवज्रं नाम समाधिं समापद्येदं बोधिचित्तमुदाजहार–

अनुत्पन्ना इमे भावा न धर्मा न च धर्मता ।
आकाशमिव नैरात्म्यमिदं बोधिनयं दृढम् ॥४॥
इत्याह भगवान् अक्षोभ्यवज्रस्तथागतः ।

अथ भगवान् रत्नकेतुवज्रस्तथागतः सर्वतथागतनैरात्म्यवज्रं नाम समाधिं समाधिं समापद्येदं बोधिचित्तमुदाजहार–

अभावाः सर्वधर्मास्ते धर्मलक्षणवर्जिताः ।
धर्मनैरात्म्यसम्भूता इदं बोधिनयं दृढम् ॥५॥
इत्याह भगवान् रत्नकेतुवज्रस्तथागतः ।

अथ भगवान् अमितायुर्वज्रस्तथागतः सर्वतथागतज्ञानार्चिःप्रदीपवज्रं नाम समाधिं समापद्येदं बोधिचित्तमुदाजहार–

अनुत्पन्नेषु धर्मेषु न भावो न च भावना ।
आकाशपदयोगेन इति भावः प्रगीयते ॥६॥
इत्याह भगवान् अमितायुर्वज्रस्तथागतः ।

अथ भगवान् अमोघसिद्धिवज्रस्तथागतः सर्वतथागताभिभवनवज्रं नाम समाधिं समापद्येदं बोधिचित्तमुदाजहार–

प्रकृतिप्रभास्वरा धर्माः सुविशुद्धा नभः समाः ।
न बोधिर्नाभिसमयमिदं बोधिनयं दृढम् ॥७॥
इत्याह भगवान् अमोघसिद्धिवज्रस्तथागतः ।

अथ खलु मैत्रेयप्रमुखा महाबोधिसत्त्वाः सर्वतथागतकायवाक्चित्त-गुह्यधर्मतत्त्वाक्षरं श्रुत्वा आश्चर्यप्राप्ता अद्भुतप्राप्ता इदमुदानमुदानयामासुः ।

अहो बुद्ध अहो धर्म अहो सङ्घस्य देशना ।
शुद्धतत्त्वार्थ शुद्धार्थ बोधिचित्त नमोऽस्तु ते ॥८॥

धर्मनैरात्म्यसंम्भूत बुद्धबोधिप्रपूरकः ।
निर्विकल्प निरालम्ब बोधिचित्त नमोऽस्तु ते ॥९॥

समन्तभद्र सत्त्वार्थ बोधिचित्तप्रवर्तक ।
बोधिचर्य महावज्र बोधिचित्त नमोऽस्तु ते ॥१०॥

चित्तं तथागतं शुद्धं कायवाक्चित्तवज्रधृक्११ ।
बुद्धबोधिप्रदाता च बोधिचित्त नमोऽस्तु ते ॥११॥

इति सर्वतथागतकायवाक्चित्त रहस्यातिरहस्ये गुह्यसमाजे महागुह्यतन्त्रराजे बोधिचित्तपटलो द्वितीयोऽध्यायः ।

श्री गुह्यसमाजतन्त्रे वज्रब्युहोनामसमाधि पटलस्तृतीयः

अथ भगवान् कायवाक्चित्तवज्रस्तथागतः सर्वतथागतस्फरणमेघब्यूहं नाम समाधि समापद्येदं वज्रव्यूहं नाम समाधिपटलमुदाजहार ॥

ओँ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् ॥
आकाशधातुमध्यस्थं भावयेद् बुद्धमण्डलम् ।
रश्मिमेघमहाव्यूहं बुद्धज्वालासमप्रभम् ॥१॥

पञ्चरश्मिसमाकीर्णं समन्तात् परिमण्डलम् ।
पञ्चकामगुणाकीर्णं पञ्चोपहारमण्डितम् ॥२॥

भावयित्वा समासेन बिम्बमध्ये विभावयेत् ।
वैरोचनमहामुद्रां कायवाक्चित्तलक्षिताम् ॥३॥

कायवाक्चित्तवज्रस्य मुद्रां वाऽथ विभावयेत् ।
अक्षोभ्य प्रवरां मुद्रां सम्भारद्वययोगतः ॥४॥

रत्नकेतुमहामुद्राममितायुः प्रभाकरीम् ।
अमोघसिद्धिमहामुद्रां भावयेद् बुद्धमण्डले ॥५॥

इन्दनीलप्रभाकारं कायवाक्चित्तवज्रिणम् ।
वज्रहस्तं महाज्वालं विकटोत्कटभीषणम् ॥६॥

स्फटिकेन्दुप्रभाकारं जटामुकुटमण्डितम् ।
चक्रहस्तं महाज्वालं नानालङ्कारभूषितम् ॥७॥

जाम्बूनदप्रभाकारं बुद्धमेघसमाकुलम् ।
नवशूलं महावज्रं पाणै तस्य विभावयेत् ॥८॥

मरकतप्रभाकारं वज्रज्वालाविभूषितम् ।
रत्नहस्त विभावित्वा ज्वालामेघं समन्ततः ॥९॥

पद्मरागप्रभाकारं जटामुकुटमण्डितम् ।
पद्महस्तं महाज्वालं भावयेद् रागवज्रिणम् ॥१०॥

पञ्चरश्मिप्रभाकारं बिम्बममोघवज्रिणम् ।
खड्गहस्तधरं सौम्यं भावयेद्बुद्धमण्डलम् ॥११॥

अथ भगवान् कायवाक्चित्तवज्रस्तथागतः धर्मधातुस्वभाववज्रं नाम समाधिं समापद्येदं कायवाक्चित्ताधिष्ठानमन्त्रमुदाजहार ॥

ओं धर्मधातुवज्रस्वभावात्म-कोऽहम् ॥

पञ्चवर्णं महारत्नं सर्षपस्थलमात्रकम् ।
नासिकाग्रे प्रयत्नेन भावयेद् योगतः सदा ॥१२॥

स्थिरं तु स्फारयेद् रत्नमस्थिरं नैव स्फारयेत् ।
स्फारयेत् प्रवरैर्मेघैर्वज्रज्वालासमप्रभैः ॥१३॥

चक्रवज्रमहामेघैः पद्मकोशवरायुधैः ।
बोधिसत्त्वमहामेघैः स्फारयेत् स्फरणात्मकः ॥१४॥

आकाशधातुमध्यस्थं वज्रमण्डलमालिखेत् ।
स्वच्छमण्डलमध्यस्थं भावयेत् चक्रमण्डलम् ॥१५॥

पद्ममण्डलसङ्काशं भावयेत्पद्मभावनैः ।
रत्नमण्डलसङ्काशं भावयेत् रत्नतत्परः ॥१६॥

योगमण्डलसम्भूतं लिखेदाकाशसन्निधौ ।
एते वै प्रवरा बुद्धाः कायवाक्चित्तभावनैः ।
मण्डलवज्रसम्भूताः सर्वज्ञाकारलाभिनः ॥१७॥

इति श्री सर्वतथागतकायवाक्चित्तरहस्यातिरहस्ये गुह्यसमाजे महागुह्यतन्त्रराजे वज्रंव्यूहो नाम समाधिपटलस्तृतीयः ।

श्री गुह्यसमाजतन्त्रे गुह्य काय्वाक्चित्तमण्डल पटलस्चतुर्थो

अथ भगवन्तः सर्वतथागताः पुनः समाजमागम्य भगवन्तं सर्वतथागतगुह्यकायवाक्चित्तवज्राधिपतिं अनेन स्तोत्रराजेनाध्येषितवन्तः ।

सर्वताथागतं शान्तं सर्वताथागतालयम् ।
सर्वधर्माग्रनैरात्मं देश मण्डलमुत्तमम् ॥१॥

सर्वलक्षणसम्पूर्णं सर्वलक्षणवर्जितम् ।
समन्तभद्रकायाग्र्यं भाषमण्डलमुत्तमम् ॥२॥

शान्तधर्माग्रसम्भूतं ज्ञानचर्याविशोधकम् ।
समन्तभद्रवाचाग्र्यं भाषमण्डलमुत्तमम् ॥३॥

सर्वसत्त्वमहाचित्तं शुद्धं प्रकृतिनिर्मलम् ।
समन्तभद्रचित्ताग्र्यं घोषमण्डलमुत्तमम् ॥४॥

अथ वज्रधरः शास्ता त्रिलोकस्तु त्रिधातुकः ।
त्रिलोकवरवज्राग्र्यस्त्रिलोकाग्रानुशासकः ॥५॥

भाषते मण्डलं रम्यं सर्वताथागतालयम् ।
सर्वताथागतं चित्तं मण्डलं मण्डलाकृतिम् ॥६॥

अथातः सम्प्रवक्ष्यामि चित्तमण्डलमुत्तमम् ।
चित्तवज्रप्रतीकाशं कायवाक्चित्तमण्डलम् ॥७॥

नवेन सुविशुद्धेन सुप्रमाणेन चारुणा ।
सूत्रेण सूत्रयेत् प्राज्ञः कायवाक्चित्तभावनैः ॥८॥

द्वादशहस्तं प्रकुर्वीत चित्तमण्डलमुत्तमम् ।
चतुरस्रं चतुर्द्वारं चतुष्कोणं प्रकल्पयेत् ॥९॥

तस्याभ्यन्तरतश्चक्रमालिखेत्परिमण्डलम् ।
मुद्रान्यासं ततः कुर्यात् विधिदृष्टेन कर्मणा ॥१०॥

तस्य मध्ये लिखेद् वज्रमिन्द्रनीलसमप्रभम् ।
पञ्चशूलं महाज्वालं भयस्यापि भयङ्करम् ॥११॥

पूर्वेण तु महाचक्रं वज्रज्वालाविभूषितम् ।
दक्षिणेन महारत्नं स्फुलिङ्गगहनाकुलम् ॥१२॥

पश्चिमेन महापद्मं पद्मरागसमप्रभम् ।
उत्तरेण महाखड्गं रश्मिज्वालाकुलोज्वलम् ॥१३॥

पूर्वकोणे लिखेन्नेत्रं मेघमध्य समप्रभम् ।
अक्षिणेन ततो वज्रं मामकीकुलसम्भवम् ॥१४॥

पश्चिमेन लिखेत्पद्मं सकन्दं विकचाननम् ।
उत्तरेणोत्पलं कुर्यान्नीलाभ्रमिव शोभनम् ॥१५॥

आलिखेत् पूर्वद्वारे तु मुद्गरं ज्वालसुप्रभम् ।
दक्षिणेनालिखेद्दण्डं वज्रज्वालादिसुप्रभम् ॥१६॥

पश्चिमेनालिखेत्पद्मं खड्गज्वालाप्रभाकरम् ।
उत्तरेण लिखेद्वज्रं वज्रकुण्डलिवज्रिणम् ॥१७॥

परिस्फुटं तु विज्ञाय मण्डलं चित्तमुत्तमुत्तमम् ।
पूजां कुर्वीत यत्नेन कायवाक्चित्तपूजनैः ॥१८॥

षोडशाब्दिकां संप्राप्य योषितं कान्तिसुप्रभाम् ।
गन्धपुष्पाकुलां कृत्वा तस्य मध्ये तु कामयेत् ॥१९॥

अधिवेष्टच च तां प्रज्ञां मामकीं गुणमेखलाम् ।
सृजेद्बुद्धपदं सौम्यमाकाशधात्वलङ्कृतम् ॥२०॥

विण्मूत्रशुक्ररक्तादीन् देवतानां निवेदयेत् ।
एवं तुष्यन्ति सम्बुद्धाः बोधिसत्त्वा महाशयाः ॥२१॥

इति श्रीसर्वतथागतकायवाक्चित्तरहस्यातिरहस्ये गुह्यसमाजे महागुह्यतन्त्रराजे गुह्यकायवाक्चित्तमण्डलपटलश्चतुर्थोऽध्यायः

●

१२) [वज्रकवच][१]

ओं नमः श्री वज्रसत्त्वाय ॥

वज्रसत्वोवाच–

नीरंजनं[२]निराकारं[३]शुन्येशुन्ये महाशुन्ये
निरालम्बं[४] अमुरुतिं[५] ततो न हि पृथिवी ॥१॥

मम वज्रशरीरैकशिरोष्णीषस्वर्ग्गवरं[६]
पातालें[७] पादस्थापन उदरन्तु मर्त्यमण्डलं ॥२॥

आकाशजायते देवी प्रज्ञापारमिता शुभा
वज्रसत्त्ववज्रोपाय घण्ठप्रज्ञापारमिता ॥३॥

वैरोचनशिरोद्भवः[८] वाममुखे अमिताभः
अक्षोभ्यहृदयजातः[९] रत्ननाभौ अमोघपाद ॥४॥

ललाटस्थ[१०] वैरोचन दाहिनरत्नसम्भवः
पश्चिमस्थ[११] अमिताभ[१२] वामस्थो[१३] अमोघसिद्धिः ॥५॥

वैरोचनमहाज्योतिशुक्लवर्ण्णमहोज्वलः[१४]
स्वेतपीतरक्तश्यामश्चतुर्वक्त्रा[१५] भवतुऽहं ॥६॥

परमगुरुवज्राचार्य्यः वज्रघण्ठधरशुभः
प्रज्ञाज्ञानसमालिङ्गः,सर्व्वतथागतोद्भवः ॥७॥

नासोद्भव गगणञ्ज[१६] क्षितिगर्भचक्षुद्वयः[१७]
कर्ण्णेद्भव वज्रपाणि जिह्वायां तु लोकेश्वरः ॥८॥

ममात्मकमञ्जुश्रीः[१८] कायसर्व्वणीवरण विष्काम्भि
श्वास जायते मैत्रेय[१९] बीजस्थ[२०] समन्तभद्रः[२१] ॥९॥

भुजदहिन यमान्तको[२२] वामभुजअपराजिता
मुखे हयग्रीवो गुह्ये अमृतकुण्डलिः[२३] ॥१०॥

अचल दहिनवाहौ[२४] वामवाहुतक्किराजः
नीलदण्डदहिनजानौ[२५] वामजानु महाबलः ॥११॥

उष्णीषचक्रवर्त्ति स्वर्गस्थ[२६]स्थापनं मम
अधोतु[२७] शुंभराजेन पातालसंस्थितो[२८] अहं ॥१२॥

अथ प्रज्ञापारमितोवाच–
चतुर्देवी समोद्भवरोमक्लेशोद्भवनाशं आकाशेमेघ-
मण्डलं ॥१३॥

मोहरतिरोचना द्वेषरतिमामकी
रागरतिपाण्डुलादेवी तारावज्ररती ॥१४॥

पृथिवीलोचनाख्यान्ता[२९] आप्धातु मामकी
तेजपाण्डुराभवश्चैव वायूतारा प्रकीर्तिताः[३०] ॥१५॥

वज्रसत्त्वोवाच–
विश्ववज्र भूमिस्थापं चतुर्दिगं वज्रशुचिः
आकाशगगणगञ्जो[३१] मध्यस्थ अक्षोभ्यो मम ॥१६॥

तत्र पूर्व्वे वैरोचनः दहिने रत्नसम्भवः
पश्चिमश्च अमिताभः उत्तरे अमोघसिद्धिः ॥१७

अग्निकोण[३२]रोचना नैऋत्यि[३३] देवीमामकी
वायुव्या पाण्डरादेवी इशानेदेवी आर्य्यतारा ॥१८॥

॥ इतिगर्भमण्डलं[३५] ॥

आग्नेस्थ[३६] रूपवज्रा: नैऋतिस्थ[३७] शब्दवज्रा:
वायुव्यां गन्धवज्रा: इशानस्थ[३८] रसवज्रा: ॥१९॥

पूर्ववाहेप्रतीकाया: मैत्रीयक्षितिगर्भ
दक्षिणस्थ प्रतीकाया: वज्रपाणिखगर्भा[३९] ॥२०॥

पश्चिमस्थ प्रतीकाया: लोकेश्वरमञ्जूश्रीय:
सर्वणीवरणविष्कंभि: समन्तभद्रस्य उत्तर: ॥२१॥

पूर्वद्वारे यमान्तक:[४०] दक्षिणद्वारे प्रज्ञान्तक:
पश्चिमद्वारे पंद्मान्तक: उत्तरद्वारे विघ्नान्तक: ॥२२॥

इशानकोणे अचल[४१] अग्निकोणे[४२] तर्क्किराज:
नैऋत्यस्थो नीलदण्डो वायुव्यां[४३] महाबल: ॥२३॥

एते तथागतव्याप्ता दिग्विदिगं स्थिरोभव:
एवन्तु पृथिविमण्डलं भवन्तु वज्रकवच: ॥२४॥

॥ इति श्री वज्रसत्त्वकायस्थ तथागतव्याप्तशतं समाप्त ॥

●

१३) पाद टिप्पणी

(१) वैरोचन वुद्धया विषय पादटिप्पणी

अ) वैरोचन वुद्धया ध्यान (शारीरिक वर्णन)

१. वौ.स्तो.सं. २, पृ. ७२

२. ने.वौ.स्तो., पृ. ४४

३. नि.यो. पृ. ४४

४. स.त.सं., पृ. ३०

५. ने.वौ.स्तो., पृ. १३

६. ने.भा.दे.स्तो., पृ. ६

७. ने.वौ.स्तो., पृ. १६

८. ६; धारणी संग्रह ६, पृ. ४४

९. नि.यो. पृ. ५

१०. ऐ. पृ. ३६

११. ऐ. पृ. ४४

आ) वैरोचन बुद्धया विशुद्धि

१२. बौ.त.को.-१, पृ. (व.ति.टि., पृ. ८५)

१३. ऐ. -२, पृ. १३३ (अ.क. पृ. ४६)

१४. ऐ. -१, पृ. १३३ (हे.त.टि., पृ. १९०)

१५. ऐ. -१, पृ. १३३ (व.ति.टि. पृ ४९)

१६. ऐ. -२, पृ. १३३ (गु.स.प्र., पृ. ५१)

१७. ऐ. -१, पृ. ११८ (हे.त. २२.५३)

१८. ऐ. -२, पृ. १३३ (वि.प्र., II १८६)

१९. ऐ. -२, पृ. १३३ (अ.क., पृ. १८)

२०. ऐ. -२, पृ. १३३ (सं.त., पृ. २)

२१. ऐ. ऐ ऐ ऐ

२२. छ पृ. ४४ क

२३. ऐ.

ई) वैरोचन बुद्धया अभिषेकगाथा

२४. पा.भि., पृ. १०

२५. कि.सं., पृ. ९५

इ) वैरोचन बुद्धया धारणी

२६. क- औं नमो: भगवत्य वैलोचनप्रभतुक्यतुराजाय

ख- औं नमो भगवते आर्य्य महावैरोचनाय ॥ औं नमो भगववैरोचन प्रभतुराजाय तथागतायांर्हन्ते

ग- ० प्रभराजाय तथागतायाऽर्हने ०

च- औं नमो भगवत्ये ०

२७. ग- औं तद्यथा

२८. ख- शुष्मे २

२९. क,ग,च- पुस्तकेषु नास्ति ।

३०. ख- पुस्तके नास्ति

क, ग, घ, च,- समय

३१. क- सान्ते २

च, ङ,- शांते २

३२. घ, ङ- दांते २

३३. क, ग, च- असमारोप्य

ख- समारोप्य

छ- समारूप्ये

३४. क, ग,- पुस्तकयो नास्ति

ख- अनालम्वे तलंवे

घ- अरम्वतरम्व

च- अनारम्वे

छ- अनालवे तरम्वे

३५. क- जसमाती

ख- यशोभवति

ग- जसवति

घ, ङ- यथोभवति

च- जस्वभवति

छ- जसोभवन्ति

३६. क, ग, च- महातेजा

ङ- महाते

३७. क- निरारंख्य

निरामन्यराकुरे

ग, च- पुस्तकयो नास्ति

छ- निलालम्वे

३८. क-

ख- निरामन्यराकुरे

ग- निराकूले २

च- निलाकुले

३९. क- निर्वाने

ख- निर्वाम्य

४०. क- ० धिष्ठिष्ठन्तु

ख, छ- सर्वबुद्धानांधिष्ठानां धिष्ठिते

४१. क- इति वैलोचननाममन्त्रधारणी समाप्तः ।

ख- ० समाप्त

ग- ० मन्त्रधारणी समाप्तं

च- इदमवोच, भगवान् वैरोचनतथागतो महानुसंसाय धारणी ॥

(२) अक्षोभ्यबुद्धया विषय पादटिप्पणी

अ) अक्षोभ्य बुद्धया ध्यान (शारीरिक वर्णन)

१. बौ.स्तो.सं. (२), पृ. ७२

२. ने.बौ.स्तो, पृ. ४५

३. ऐ., पृ. १५

४. ने.भा.दे.स्तो., पृ. ६

५. ने.बौ.स्तो., पृ. १२

६. अ.स., पृ. ७

७. नि.यो., पृ. ५

८. ऐ., पृ. ४८

९. ऐ., पृ. ५४

आ) अक्षोभ्य बुद्धया विशुद्धि

१०. बौ.त.का.(१), पृ. २, (व.ति.टि, पृ. ८५)

११. ऐ. (२)। पृ. ३, (वि.प्र. II ११८)

१२. ऐ. (१), पृ. २, (हे.त.टि., पृ. १९१)

१३. ऐ. ऐ. (अ.व.सं., पृ. २९)

१४. ऐ. ऐ. (गु.स.प्र., पृ. ५१)

१५. ऐ. ऐ. (हे.त. २२.५४)

१६. ऐ (२) पृ. ३, (वि.प्र., II १५८)

१७. ऐ. ऐ. , (अ.क. पृ. १८)

१८. ऐ. ऐ. , (स.त. पृ. २)

१९. ऐ. ऐ. ऐ.

२०. ऐ. (१) पृ. २, (स.सि. २.७)

२१. ऐ. (२) पृ. ३, (अ.क. पृ. २१)

ई) अक्षोभ्य बुद्धया अभिषेकगाथा

२२. पा.भि., पृ. १३

२३. क्रि.सं., पृ. ९५ (क)

इ) अक्षोभ्य बुद्धया धारणी

२४. क- भगवत्य

२५. क- आर्यश्री अक्ष्योभ्याय

२६. ख- तथागतायांहन्ते

२७. क- कङ्गनी

२८. क, ख, ग, पुस्तकेषु नास्ति

२९. क- लोचणी

३०. क- त्रिलोचनी

ख- मारनि २ त्रोत्रनि २ संत्रासनि

छ- त्रोचनि

घ- त्रोतनि२ संबोतनि२ संत्राशष२

ङ- त्रोतनि२ संत्राशय२

छ- संत्राशय२

३१. घ, ङ, छ प्रतिहन२

३२. क० नी

ख, घ, ङ- सर्वकर्मपरंपरानि मे स्वाहा

३३. क- ०नाञ्च

३४. च- पुस्तके नास्ति ।

३५. क- ०नाम मन्त्रोधारणी समाप्तः ।

ख- आर्यश्री समाप्त ।

ग- ०समाप्तं ।

छ- इति अक्ष्योभ्यनामधारणी समाप्तः ।

(३) रत्नसम्भव बुद्धया विषय पादटिप्पणी

अ) रत्नसम्भव बुद्धया ध्यान (शारीरिक वर्णन)

१. बौ.स्तो.सं. (२), पृ. ७२

२. ने.बौ.स्तो, पृ. ४४

३. ऐ. , पृ. १६

४. ने.भा.दे.स्तो. पृ. ६

५. ने.बौ.स्तो., पृ. १२

६. नि.यो., पृ. ३६

७. ऐ. , पृ. ५

८. ऐ. , पृ. ४८

९. ऐ. , पृ. ५४

आ) रत्नसम्भव बुद्धया विशुद्धि

१०. बौ.त.का.(१)। पृ. १०२ (व.ति.टि., पृ. ८५)

११. ऐ. ऐ., पृ. १०२ (गु.स.प्र.., पृ. ५१)

१२. ऐ. (२), पृ. ११७ (वि.प्र. II १५८)

१३. ऐ. (१) पृ. १०२ (गु.स.प्र., पृ. २४)

१४. ऐ. (१) पृ. ऐ. . ऐ.

१५. ऐ. (२) पृ. ११७ (अ.क. पृ. १९)

१६. ऐ (२) पृ. , (वि.प्र., II ११८)

१७. ऐ. (१) पृ. १०२, (ज्ञा.सि. १५.७)

१८. ऐ. (२) पृ. (वि.प्र., II ११८)

१९. ऐ. (२) पृ. (स.त. - पृ. २)

२०. ऐ. ऐ. ऐ. ऐ.

ई) रत्नसम्भव बुद्धया अभिषेकगाथा

२१. पा.भि., पृ. ११

२२. क्रि.सं. पृ. ९५ क

इ) रत्नसम्भव बुद्धया धारणी

२३. क- भगवत्य

२४. ख- आर्य्य श्रीरत्न°

२५. ख,ग तथागतार्हन्ते

२६. क- °संभव्ये रत्नोभव रत्नमारौ न·किरणै सर्वाथसाधन्य सर्वकर्मक्रेस क्षयंकरिय

ख, घ, ङ, छ- °संभवे स्वाहा।

ग- °संभवे रत्नोद्भव रत्नमारान् कीर्णे

च- रत्नविजय स्वाहा

२७. क- °धारणीमन्त्रोमाप्तः

ख, छ- °समाप्त

ग- नाममन्त्रो धारणिसमाप्त।

(४) अमिताभ बुद्धया विषय पादटिप्पणी

अ) अमिताभ बुद्धया ध्यान (शारीरिक वर्णन)

१. बौ.स्तो.सं. (२), पृ. ७२

२. ने.बौ.स्तो., पृ. ४८

३. ऐ., पृ. १२

४. ने.भा.दे.स्तो., पृ. ६

५. ने.बौ..स्तो, पृ. १६

६. नि.यो., पृ. ३६

७. ऐ., पृ. ५

८. ऐ., पृ. ४८

९. ऐ., पृ. ५४

आ) अमिताभ बुद्धया विशुद्धि

१०. वौ.त.को. (१), पृ. ८ (व.ति.टि., पृ. ४८)

११. ऐ. (२), पृ. १० (अ.क., पृ. १८-१९)

१२. ऐ. (१), पृ. ८ (हे.त. २.२.५५)

१३. ऐ. ऐ. पृ. ८, (व.ति.टि. पृ. ४८)

१४. ऐ. ऐ. ऐ. (गु.स.प्र., पृ. ५१)

१५. ऐ. ऐ. ऐ. (गु.स.प्र. पृ. ५२)

१६. ऐ. (२), पृ. ११ (वि.प्र. II १५८)

१७. ऐ. ऐ., ऐ. (ऐ. ११८)

१८. ऐ. (१), पृ. ८ (ज्ञा.सि. १५.८)

१९. ऐ. (२), पृ. ११ (कृ.त.टि., पृ. ७)

२०.ऐ. ऐ. ऐ. (वि.प्र. II १८६)

२१. ऐ. ऐ. ऐ. (ऐ. III ६९)

२२. ऐ.

२३

२४. ऐ. (१), पृ. ८ (स.सि., २.७)

२५. " (२), पृ. ११ (वि.प्र. II ११७)

ई) अमिताभ बुद्धया अभिषेकगाथा

२६. पा.भि., पृ. ९

२७. कि.सं., पृ. ९५ क

इ) अमिताभ बुद्धया धारणी

२८. क- भगवत्य

२९. क, ग अमृताभाय

ख आर्य्य श्री अमृताभाय

छ अमिताय

३०. ख ०यांर्हन्ते

ग ०र्हन्ते

३१. क, ख, ग अमृते

३२. क अमृतात्भत्य

ख अमृतोद्भवे

घ अमितोभवे

३३. क अमृतसंभव्य

ख अमृतसंभवे

३४. क,ग पुस्तकेनास्ति

ख अमृतसिद्धे

३५. क,ग पुस्तके नास्ति

ख अमृततेजेः १

घ, ङ अमितततेजे २

३६. क अमृतविक्रान्त

ख अमृतविक्रान्तेः

ग अमृतविक्रा

३७. क पुस्तके अमित नास्ति

ख अमृतगामिनि

ग पुस्तक अमितनास्ति

छ °गामिनि

३८. क पुस्तके नास्ति

ग पुस्तके नास्ति

३९. क पुस्तके नास्ति

ख भिवसे

ग पुस्तके नास्ति

४०. क पुस्तके नास्ति

४१. ख सर्वकर्म्मक्षयं

४२. क पुस्तके नास्ति

४३. क °धारणीमन्त्रो समाप्तः

ख °अमृताभनाम धारणी समाप्त

ग °नाममन्त्रोधारणी समाप्त

छ °समाप्तः।

(५) अमोघसिद्धि बुद्धया विषय पादटिप्पणी

अ) अमोघसिद्धि बुद्धया ध्यान (शारीरिक वर्णन)

१. बौ.स्तो.सं. २, पृ. ७२

२. ने.बौ.स्तो., पृ. ४४

३. ने.बौ.स्तो., पृ. १३

४. ने.भा.दे.स्तो., पृ. ६

५. ने.बौ.स्तो, पृ. १६

६. नि.यो., पृ. ३६

७. ऐ. , पृ. ५

८. ऐ., पृ. ४८

९. ऐ., पृ. ५४

आ) अमोघसिद्धि बुद्धया विशुद्धि

१०. बौ.त.को. (१), पृ. ९ (व.ति.टि., पृ. ८५)

११. ऐ. (२), पृ. ११ (अ.क., पृ. १९)

१२. ऐ. (१), पृ. ९, (हे.त. २.२.५६)

१३. ऐ. ऐ., पृ. ९ (गु.स.प्र., पृ. ५१)

१४.ऐ. ऐ. ऐ. (ज्ञा.सि., १५.९)

१५. ऐ. ऐ. ऐ. (स.सि. २.८)

१६. ऐ. (२), पृ. १५ (वि.प्र. II ११८)

१७. ऐ. ऐ. ऐ. (ऐ. १५८)

१८. ऐ. ऐ ऐ. (ऐ. १८६)

१९. ऐ. ऐ. ऐ. (ऐ. III ६९)

२०. ऐ. ऐ. ऐ. (ऐ. II ११७)

२१. ऐ. ऐ. ऐ. (स.त.प. २)

२२. ऐ. ऐ. ऐ. (ऐ. ऐ.)

ई) अमोघसिद्धि बुद्धया अभिषेकगाथा

२३. पा.भि., पृ. ११

२४. कि.सं., पृ. ९५ क

इ) अमोघसिद्धि बुद्धया धारणी

२५.क भगवत्य

२६. क अमोघसिद्धिय

ख आर्य्य अमोघसिद्धिय

ग अमोघसिद्धाय

घ अमोघसिद्धिये

२७. क. पद्मसिद्धे

२८. क सुसिद्धे

ग, घ, ङ पुस्तकेषु नास्ति

२९. क पुस्तके नास्ति

ग सर्वासिद्धे

३०. क इति अमोघसिद्धिनाममन्त्रो धारणी समाप्तः

ख समाप्त

ग °नाम मन्त्रोधारणी समाप्तं ।

६) पञ्चवुद्धया अभिषेकगाथा विषय पादटिप्पणी

१. पा.भि., पृ. १०
२. ऐ. पृ. १३
३. ऐ. पृ. ११
४. ऐ. पृ. १२
५. ऐ. पृ. ११
६. द्रष्टव्य क्रियासंग्रह पृ. १२०-१२३

७) पञ्चवुद्धया स्तोत्र विषय पादटिप्पणी

१. नेपाल वौद्ध स्तोत्र
२. मध्येगत°
३. पूर्व°
४. °सुरं
५. °उपहार
६. ढोषीतम्
७. नेपाल वौद्ध स्तोत्र
८. मध्य°
९. नमासि
१०. नेपाल वौद्ध स्तोत्र
११. °देहा
१२. नमामी
१३. °महोरात्र
१४. °श्री
१५. °देहा
१६. नमामी
१७. °देहा
१८. °धारिता
१९. मुरुति
२०. °कृता
२१. °सिद्धि
२२. °देहा
२३. °पालिता
२४. °मुरुति
२५. °माला
२६. नेपाल भाषा देव स्तोत्र
२७. वैरोचनं वुद्धो
२८. °संमन्यभद्रकः
२९. °पद्य
३०. श्वेतवर्ण
३१. पूर्व
३२. °संभव
३३. वज्रपाणि
३४. महावल
३५. संपूर्ण
३६. नीलवर्ण

३७. °सभव
३८. रत्नपाणि
३९. महातेजा
४०. °वाहन
४१. °संपूर्ण
४२. °वर्ण
४३. अमिताभव
४४. वज्रपाणि
४५. कृपावंत
४६. °संपूर्ण
४७. रक्तवर्ण
४८. °शिद्धि
४९. °पाणि
५०. °धर
५१. °वाहन
५२. संपूर्ण
५३. श्यामवर्ण
५४. °सत्त्व
५५. समोध्यान
५६. °धातु
५७. नेपाल बौद्ध स्तोत्र
५८. °स्थित
५९. स्वयम्भू/चैत्य
६०. °गण
६१. °वल
६२. °नाशन
६३. °मुख
६४. °वाहन
६५. °देहा
६६. °निर्जित
६७. वज्रासन
६८. श्रीअक्षोभ्य
६९. °मुख
७०. °वाहन
७१. °देहा
७२. °मुख
७३. °वाहन
७४. °देहा
७५. °मय
७६. °मुख
७७. वाहन
७८. °देहा
७९. °कृत
८०. °देहा
८१. °वाहन
८२. °मूर्ति
८३. पद्य
८४. °मय
८५. °मणिं
८६. °कीर्ति
८७. °नाशन
८८. °स्थापन
८९. °चैत्य
९०. वुद्ध
९१. °लेपन
९२. सुफल
९३. °सप्तमी

८) वज्रकवच विषय पाददिप्पणी

१. धारणीसंग्रहस संग्रहित जुयाच्वंगु
२. नीलंजनं
३. नीराकार
४. निरारंव निराकारे

५. अमुरुति
६. °वयं
७. पातारे
८. °भवं
९. °जतं
१०. °तस्य
११. पश्चिमस्य
१२. अमिभ
१३. वामस्य
१४. °ज्वरं
१५. °वक्त्र
१६. गगणगञ्जेन
१७. °चक्षुदोय
१८. °श्रीयं
१९. मैत्रीय
२०. बीजस्य
२१. °भद्रं
२२. जन्मा°
२३. अमित°
२४. अचरदहिनवाहु
२५. °जानु
२६. स्वर्गस्य
२७. अघोन्तु
२८. °सस्थिता
२९. °रोचनाक्षान्ता:
३०. प्रकीर्तिता
३१. °गञ्जेन
३२. अग्ने°
३३. नैऋत्ये
३४. वायुव्ये
३५. °मण्डल
३६. अग्नेस्थास्य
३७. नैऋत्येसो
३८. इशानस्य
३९. °गर्भाय
४०. जन्मातक
४१. अचर
४२. अग्न°
४३. वायुव्यस्य

१४) पाण्डुलिपि संकेट सूचि

क : धारणीसंग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि. नं.बि. १०६/४०

ख : धारणीसंग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि.नं.वि. १०७/१४

ग : धारणीसंग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि.नं.ए. १३०/२०

घ : धारणीसंग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि.नं.ए. १३०/३५

ङ : धारणी संग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि.नं.ए. १३१/९

च : धारणी संग्रह, नेपाल राष्ट्रिय अभिलेखालय, काठमाण्डौं, रि.नं.ए. १३१/१०

छ : धारणी संग्रह, ज्ञानिराजा बज्राचार्य, जनबहा, यें

ज : क्रि.सं. : क्रिया संग्रह, डा. नरेशमान बज्राचार्य, भ्वावहाः, यें

१५) संकेटसूचि तथा सन्दर्भ ग्रन्थसूचि

अ.प.ना. : वज्राचार्य, दिव्यवज्र (सं.), <u>अद्वय परमार्थ नामसाङ्गीति,</u> काठमाण्डौं : भूषण प्रकाशन- २,

अ.व.सं. : भक्ताचार्य, विनयतोष (सं), <u>अद्वय वज्र संग्रह,</u> वरोदा : ओरियन्टल इन्स्टिच्युट, इ.सं. १९२७ ।

द.छा. : वज्राचार्य, वद्री रत्न (सं), <u>दशकर्म प्रतिष्ठा, छाहायेकेविधि व बलिमाला,</u> यें (काठमाण्डौं) : चन्द्रमान मालाकार, वि.सं २०४५ ।

ने.बौ.स्तो. : <u>नेपाल बौद्ध स्तोत्र,</u> यें (काठमाण्डौं) : सत्वतारा वज्र वज्राचार्य, वि.सं. २०५६ ।

ने.भा.दे.स्तो. : वज्राचार्य, विश्ववज्र (सं), <u>नेपालभाषा देव स्तोत्र,</u> यल (ललितपुर) : विश्ववज्र वज्राचार्य, वि.सं २०३७ ।

नि.यो. : भक्ताचार्य, विनयतोष, <u>निष्पन्नयोगावली अफ महापण्डित अभयाकरगुप्त,</u> बरोदा : ओरियण्टल इन्स्टिच्युट, इ.सं. १९७२ ।

बौ.त.को. (१) : द्विवेदी व्रजवल्लभ व ठिनलेराम शाशनी (सं), <u>बौद्ध तन्त्र कोश,</u> सारनाथ : केन्द्रिय उच्च तिव्वती शिक्षा संस्थान, इ.सं. १९९०, भाग १ ।

बौ.त.को. (२) : शाशनी, ठिनलेराम (सं.), <u>बौद्धतन्त्र कोष,</u> सारनाथ: केन्द्रिंय उच्च तिब्वती शिक्षा संस्थान, इ.सं १९९७ भाग २ ।

बौ.स्तो.सं. (१) : पाण्डेय, जनार्दश शास्त्री (सं), <u>वौद्ध स्तोत्र संग्रह,</u> वाराणसी : नरेन्द्र प्रकाश जैन, मोतीलाल वनारसी दास, इ.सं. १९९४ ।

बौ.स्तो.सं.(२) : X , बौद्ध स्तोत्र संग्रह, काठमाण्डौं : X , वि.सं. २०३९ ।

गु.त. : शास्त्री, द्वारिकादास (सं.) श्रीगुह्यसमाज तन्त्रम, वाराणसी : बौद्ध भारती, इ.सं. १९८४ ।

पा.भि. : वज्राचार्य, बद्रीरत्न, पाणिग्रहण व भिमरथारोहणविधि क्रिया, काठमाण्डौं ।

स.त.त.सं. : लोकेश चन्द्र, सर्व-तथागत-तत्त्व-संग्रह, डिल्ली : मोतीलाल वनारसीदास, इ.सं. १९८७ ।

अ.स. : वज्राचार्य, बद्रीरत्न, श्री अक्षोभ्य समाधि, काठमाडौं : तिर्थमुनि बज्राचार्य, ने.सं. ११०७ ।

गु.त.प्र.टि. : चत्रलवर्तिना, चिन्ताहरण (सं) गुह्यसमाजतन्त्र-प्रदीपोद्योतनटिकाषटकोटिब्याख्या, पटना : काशी-प्रशासन-जायसवाल-अनुशीलन-संस्था, इ.सं. १९८४ ।

अ.लो.त्रि. : वज्राचार्य, वद्रीरत्न, अमोघपाश लोकेश्वर त्रि-समाधि : कूलरत्न वज्राचार्य, यें, वि.सं २०५० ।

आ.म.ना. : डा. वनारसीलाल (सं.), आर्यमञ्जश्रीनामसङ्गीति, सारनाथ : केन्द्रिय उच्च तिब्वती शिक्षा संस्थान, इ.सं. १९९४ ।

☆

बुद्ध मण्डल

संकटा प्रिन्टिङ प्रेस फोनः ४२३११९५